Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ लक्ष्मीमन्त्रः —

वामेश ऋषिः । बृहती छन्दः । श्रीर्देवता । श्रां हृत् । श्रीं शिरः । इत्याद्यङ्गानि ॥ ध्यानम् —

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुम्भैः
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

ओं श्रीं ह्रीं महालक्ष्मि महालक्ष्मि एह्येहि सर्वसौभाग्यं मे देहि स्वाहा । चतुर्विंशतिसहस्रजपः ॥

त्रिकोणेषु त्रिबीजं स्याद्वसुकोणे परं लिखेत् ।
त्रयोदशदळे शेषं बाह्ये पञ्चाशदर्णकम् ॥
लक्ष्मीबीजावृतं यन्त्रं सर्वसौभाग्यदायकम् ।
वसुकोणमष्टकोणम् । पञ्चाशदर्णं मातृका ।